[TS 4-2-6]

ॐ या जा॒ता , ओष॑धयो दे॒वेभ्य॑स्त्रियु॒गम्पु॒रा ।
मन्दा॑मि ब॒भ्रूणा॑म॒हꣳ श॒तं धामा॑नि स॒प्त च॑ ॥

ॐ yā jātā , ōṣhadhayō dēvēbh’yas’triyugam’purā |
man’dāmi babh’rūṇāmahagm’ śhatan’
dhāmāni sap’ta cha ||

श॒तं वो᳚ , अम्ब॒ धामा॑नि स॒हस्र॑मु॒त वो॒ रुह॑ः ।
अथा॑ शतक्रत्वो यू॒यमि॒मम्मे᳚ , अग॒दं कृ॑त ॥

śhataṁ’ vō , am’ba dhāmāni sahas’ramuta vō ruhaḥa |
athā śhatak’rat’vō yūyamimam’mē , agadaṅ’ kṛta ||

पुष्पा॑वतीः प्र॒सूव॑तीः फ॒लिनी॑रफ॒ला , उ॒त ।
अश्वा॑ , इव स॒जित्व॑रीर्वी॒रुध॑ः पारयि॒ष्णव॑ः ॥

puṣh’pāvatī[fp]’ prasūvatī[fp]’ phalinīraphalā , uta |
aśh’vā , iva sajit’varīr’vīrudha[fp]’ pārayiṣh’ṇavaḥa ||

ओष॑धी॒रिति॑ मात॒रस्तद्वो᳚ देवी॒रुप॑ ब्रुवे ।
रपाꣳ॑सि विघ्न॒तीरि॑त॒ रप॑ः चा॒तय॑मानाः ॥ १ ॥

ōṣhadhīriti mātaras’tad’vō dēvīrupab’ bruvē |
rapāgm’si vigh’natīrita rapaśh’ chātayamānā-ḥa || 1 ||

अ॒श्व॒त्थे वो᳚ नि॒षद॑नम्प॒र्णे᳚ वो᳚ वस॒तिः कृ॒ता ।
गो॒भा॒ज , इत्किला॑सथ॒ यत्स॒नव॑थ॒ पूरु॑षम् ॥

aśh’vat’thē vō niṣhadanam’par’ṇē vō vasati[hk]’ kṛtā |
gōbhāja , it’kilāsatha yat’sanavatha pūruṣham ||

यदहं वाजयन्निमा , ओषधीरुहस्त , आदधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥
yadaham' vājayan'nimā , ōṣhadhīrehas'ta , ādadhē |
āt'mā yak'ṣhmas'ya naś'h'yati purā jīvagṛbhō yathā ||

यदोषधयः संगच्छन्ते राजानः समिताविव ।
विप्रः स , उच्यते भिषग्रक्षोहामीवचातनः ॥
yadōṣhadhayas' san'gach'chhan'tē rājānas' samitāviva |
vip'ras' sa , uch'yatē bhiṣhag'rak'ṣhōhāmīvachātanaḥa ||

निष्कृतिर्नाम वो माताथा यूयङ्ग् स्थ संकृतीः ।
सराः पतत्रिणीः स्थन यदामयति निष्कृत ॥२॥
niṣh'kṛtir'nāma vō mātāthā yūyag'ges' stha san'kṛtī-ḥi |
sarā[fp]' patat'riṇīīs' sthana yadāmayati niṣh'kṛta || 2 ||

अन्या वो , अन्यामवत्वन्यान्यस्या , उपावत ।
ताः सर्वा , ओषधयः संविदाना , इदम्मे प्रावता वचः ॥
an'yā vō , an'yāmavat'van'yān'yas'yā , upāvata |
tās' sar'vā , ōṣhadhayas' sam'vidānā ,
idam'mēp' prāvatā vachaḥa ||

उच्छुष्मा , ओषधीनां गावो गोष्ठादिवेरते ।
धनꣳ सनिष्यन्तीनामात्मानं तव पूरुष ॥
uch'chhuṣh'mā , ōṣhadhīnān' gāvō gōṣh'ṭhādivērate |
dhanagm' saniṣh'yan'tīnāmāt'mānan' tava pūruṣha ||

www.sanskritveda.net

अति॒ विश्वाः॑ परि॒ष्ठा स्ते॒न , इ॑व व्र॒जम॑क्रमुः ।
ओष॑धयः प्राचु॑च्यवु॒र्यत्किं च॑ त॒नुवा॒३॒ रपः॑ ॥ ३ ॥

ati viśh'vā[fp]' pariṣh'ṭhās' stēna ,
ivav' vrajamak'ramuḥu ।
ōṣhadhaya[fp]' prāchuch'yavur'yat'kiñ'
cha tanuvāgm' rapaḥa ॥ 3 ॥

याः त॑ , आत॒स्थुरा॒त्मानं॒ या , आ॑विवि॒शुः परुः॑परुः ।
तास्ते॒ यक्ष्मं॒ वि बा॑धन्तामु॒ग्रो म॑ध्यम॒शीरि॑व ॥

yās' ta , ātas'thurāt'mānañ' yā ,
āviviśhu[fp]' paru[fp]'paruḥu ।
tās'tē yak'ṣhmaṁ' vi bādhan'tāmug'rō
madh'yamaśhīriva ॥

सा॒कं य॑क्ष्म प्र प॑त श्ये॒नेन॑ किकिदी॒विना॑ ।
सा॒कं वात॑स्य॒ ध्राज्या॑ सा॒कं न॑श्य नि॒हाक॑या ॥

sākañ' yak'ṣhmap' pra pataśh' śhyēnēna kikidīvināā ।
sākaṁ' vātas'yad' dhrāj'yā sākan' naśh'ya nihākayā ॥

अ॒श्वा॒व॒तीᳲ सोम॑व॒तीमू॒र्जय॑न्ती॒मुदो॑जसम् ।
आ वि॑त्सि॒ सर्वा॒ , ओष॑धीर॒स्मा , अ॑रि॒ष्टता॑तये ॥

aśh'vāvatīgm' sōmavatīmūr'jayan'tīmudōjasam ।
ā vit'si sar'vā , ōṣhadhīras'mā , ariṣh'ṭatātayē ॥

www.salveda.net

याः फलिनीर्या , अफला , अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥४॥

yā[fp]’ phalinīr’yā , aphalā ,
apuṣh’pā yāś’h’cha puṣh’piṇīīḥi ।
bṛhas’patip’rasūtās’tā nō muñ’chan’tvagm’hasaḥa ॥ 4 ॥

या , ओषधयः सोमराज्ञीः प्रविष्टाः पृथिवीमनु ।
तासां त्वमस्युत्तमा प्र णो जीवातवे सुव ॥

yā , ōṣhadhayas’ sōmarāj’ñī[fp]’
praviṣh’ṭā[fp]’ pṛthivīmanu ।
tāsān’ tvamas’yut’tamāp’ pra ṇō jīvātavē suva ॥

अवपतन्तीरवदन्दिव , ओषधयः परि ।
यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥

avapatan’tīravadan’diva , ōṣhadhaya[fp]’ pari ।
yañ’ jīvamaś’navāmahai na sa riṣh’yāti pūruṣhaḥa ॥

याश्चेदमुपशृण्वन्ति याश्च दूरम्परागताः ।
इह संगत्य ताः सर्वाः , अस्मै सं दत्त भेषजम् ॥

yāś’h’chēdamupaśhṛṇ’van’ti
yāś’h’cha dūram’parāgatā-ḥa ।
iha saṅ’gat’ya tās’ sar’vā ,
as’mai san’ dat’ta bhēṣhajam ॥

www.sanatanaved.net

मा वों रिषत्खनिता यस्मैं चाहं खनांमि वः ।
द्विपच्चतुंष्पदुस्माकꣳ सर्वंमस्त्वनांतुरम् ॥
mā vō riṣhat'khanitā yas'mai chāhaṅ' khanāmi vaḥa ।
dvipach'chatuṣh'padas'mākagm' sar'vamas'tvanāturam ॥

ओषंधयः सं वंदन्ते सोमेंन सह राज्ञां ।
यस्मैं करोतिं ब्राम्हणस्तꣳ राजन्पारयामसि ॥५॥
ōṣhadhayas' saṁ' vadan'tē sōmēna saha rāj'ñāā ।
yas'mai karōtib' brām'haṇas'tagm' rājan'pārayāmasi ॥ 5 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.saiveda.net